# महात्मा-गाँधी-केन्द्रीय-विश्वविद्यालयः, बिहारः

## मानविकी एवं भाषासंकायः

# संस्कृतविभागः

एम. ए. द्वितीयसत्रम्

## विषयः- लघुसिद्धान्तकौमुदी

Code – SNKT2001

## उपविषयः- अजन्तपुंल्लिङ्गप्रकरणम्

डॉ. श्याम कुमार झा
सह- आचार्य, संस्कृतविभागः
महात्मा-गाँधी-केन्द्रीय-विश्वविद्यालयः

पदसाधनम्

अजन्तपुंल्लिङ्गप्रकरणम् (लघुसिद्धान्तकौमुदी)

रामशब्दः

# प्रथमाविभक्तिः

## रामः

रामशब्दात् 'अर्थवदधातुरप्रत्ययप्रातिपदिकम्' इति सूत्रेण प्रातिपदिकसंज्ञायाम्

राम+ सु 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इत्यनेन प्रथमा-एकवचने सु-प्रत्ययः

राम+स् 'उपदेशेऽजनुनासिक इत्' इत्यनेन सूत्रेण उकारस्य इत् संज्ञायां 'तस्य लोप' इति सूत्रेण लोपप्राप्ते

राम+रु 'ससजुषो रुः' इत्यनेन स् इत्यस्य स्थाने रु इति आदेशे

'उपदेशेऽजनुनासिक इत्' इत्यनेन उ कारस्य इत् संज्ञायां 'तस्य लोपः' इत्यनेन लोपप्राप्ते

'विरामोऽवसानम्' इत्यनेन अवसानसंज्ञायाम्

राम+र् 'खरवसानयोर्विसर्जनीयः' इत्यनेन र् इत्यस्य विसर्गादेशे कृते

रामः पदसिद्धम्।

## रामौ

राम+औ 'स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्' इत्यनेन प्रथमाद्विवचने औ-प्रत्ययः

राम+औ 'वृद्धिरेचि' इत्यनेन वृद्धिम्प्रबाध्य

'प्रथमयोः पूर्वसवर्णः' इत्यनेन पूर्वसवर्णदीर्घे

'नादिचि' इत्यनेन पूर्वसवर्णदीर्घस्य निषेधे

राम+औ 'वृद्धिरेचि' इत्यनेन वृद्धिः प्राप्ते

रामौ पदसिद्धम्।

## रामाः

| | |
|---|---|
| राम+जस् | ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन प्रथमाबहुवचनविवक्षायां जस्-प्रत्ययः |
| राम+अस् | ‘चुटू’ इत्यनेन जकारस्य इत् संज्ञायां ‘तस्य लोपः’ इत्यनेन लोपप्राप्ते |
| रामा+स् | ‘प्रथमयोः पूर्वसवर्णः’ इत्यनेन मकारस्योत्तरस्य अकारस्य पूर्वसवर्णे दीर्घे |
| रामा+रु | ‘ससजुषो रुः’ इत्यनेन रु इति आदेशे |
| रामा+र् | ‘उपदेशेऽजनुनासिक इत्’ इत्यनेन उ कारस्य इत् संज्ञायां ‘तस्य लोपः’ इत्यनेन लोपप्राप्ते |
| रामा+र् | ‘विरामोऽवसानम्’ इत्यनेन अवसानसंज्ञायाम् ‘खरवसानयोर्विसर्जनीयः’ इत्यनेन विसर्गादेशे कृते |
| रामाः | पदसिद्धम् । |

## द्वितीयविभक्तिः

## रामम्

| | |
|---|---|
| राम+अम् | ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन द्वितीया-एकवचनविवक्षायाम् अम्-प्रत्ययः |
| राम+अम् | ‘अकः सवर्णे दीर्घः’ इत्यनेन सूत्रेण दीर्घे प्राप्ते ‘प्रथमयोः पूर्वसवर्णः’ इत्यनेन पूर्वसवर्णे दीर्घे प्राप्ते उभयमपिप्रबाध्य |
| राम+अम् | ‘अमि पूर्वः’ इत्यनेन पूर्वरूपैकादेशे कृते |
| रामम् | पदसिद्धम् । |

## रामौ

राम+औट् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम् ङ्योस्सुप्’ इत्यनेन द्वितीयाद्विवचनविवक्षायाम् औट्-प्रत्ययः

राम+औ ‘हलन्त्यम्’ इत्यनेन टकारस्य इत्संज्ञा ‘तस्य लोपः’ इत्यनेन लोपप्राप्ते

राम+औ ‘वृद्धिरेचि’ इत्यनेन वृद्धिम्प्रबाध्य
‘प्रथमयोः पूर्वसवर्णः’ इत्यनेन पूर्वसवर्णदीर्घे
‘नादिचि’ इत्यनेन पूर्वसवर्णदीर्घस्य निषेधे

राम+औ ‘वृद्धिरेचि’ इत्यनेन वृद्धिः प्राप्ते

रामौ पदसिद्धम्।

## रामान्

राम+शस् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन सूत्रेण द्वितीयाबहुवचनविवक्षायां शस्-प्रत्ययः

राम+अस् ‘लशक्वतद्धिते’ इत्यनेन शकारस्य इत् संज्ञायां ‘तस्य लोपः’ इत्यनेन लोपप्राप्ते

रामा+स् ‘प्रथमयोः पूर्वसवर्णः’ इत्यनेन मकारोत्तरस्य अकारस्य पूर्वसवर्णदीर्घे

रामान् ‘तस्माच्छसो नः पुंसि’ इत्यनेन शसः सकारस्य न इति आदेशे
‘अट्कुप्वाङ्नुम्व्यवायेऽपि’ इत्यनेन णत्वे प्राप्ते
‘पदान्तस्य’ इत्यनेन णत्वनिषेधे कृते

रामान् पदसिद्धम्।

# तृतीयाविभक्तिः

## रामेण

राम+टा ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन तृतीया-एकवचनविवक्षायां टा-प्रत्ययः

राम+इन ‘टाङसिङसामिनात्स्याः’ इत्यनेन टा इत्यस्य स्थाने इन इति आदेशः

रामे न ‘आद्गुणः’ इत्यनेन ए-गुणैकादेशे

‘अट्कुप्वाङ्नुम्व्यवायेऽपि’ इत्यनेन नकारस्य णत्वे प्राप्ते

रामेण पदसिद्धम् ।

## रामाभ्याम्

राम+भ्याम् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन तृतीयाद्विवचनविवक्षायां ‘भ्याम्’ प्रत्ययः

‘सुपि च’ इत्यनेन अकारस्य दीर्घादेशे कृते

रामाभ्याम् पदसिद्धम् ।

## रामैः

राम+भिस् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन तृतीयाबहुवचनविवक्षायां भिस्-प्रत्ययः

राम+ऐस् ‘अतो भिस् ऐस्’ इत्यनेन भिस् स्थाने ऐस् इति आदेशः

रामै स् ‘वृद्धिरेचि’ इत्यनेन वृद्धिः

रामै रु ‘ससजुषो रुः’ इत्यनेन स-कारस्य स्थाने रु इति आदेशः

रामै र् ‘उपदेशेऽजनुनासिक इत्’ इत्यनेन उ कारस्य इत् संज्ञायां ‘तस्य लोपः’ इत्यनेन लोपप्राप्ते

रामै र् ‘विरामोऽवसानम्’ इत्यनेन अवसानसंज्ञायाम्

‘खरवसानयोर्विसर्जनीयः’ इत्यनेन विसर्गादेशे कृते

रामैः पदसिद्धम्।

## चतुर्थीविभक्तिः

## रामाय

राम+ङे ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन चतुर्थी-एकवचनविवक्षायां ङे-प्रत्ययः

राम+य ‘ङेर्यः’ इत्यनेन ङे स्थाने य इति आदेशे

‘सुपि च’ इत्यनेन मकारोत्तरस्य अकारस्य दीर्घादेशे कृते

रामाय पदसिद्धम्।

## रामाभ्याम्

| | |
|---|---|
| राम+भ्याम् | ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन चतुर्थीद्विवचनविवक्षायां ‘भ्याम्’ प्रत्ययः |
| | ‘सुपि च’ इत्यनेन अकारस्य दीर्घादेशे कृते |
| रामाभ्याम् | पदसिद्धम्। |

## रामेभ्यः

| | |
|---|---|
| राम+भ्यस् | ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन चतुर्थीबहुवचनविवक्षायां भ्यस्-प्रत्ययः |
| रामा+भ्यस् | ‘सुपि च’ इत्यनेन मकारोत्तरस्य अकारस्य दीर्घे प्राप्ते |
| रामेभ्यस् | ‘बहुवचने झल्येत्’ इत्यनेन आकारस्य एकारादेशे |
| रामेभ्यरु | ‘ससजुषो रुः’ इत्यनेन स-कारस्य स्थाने रु इति आदेशे |
| रामेभ्य र् | ‘उपदेशेऽजनुनासिक इत्’ इत्यनेन उ कारस्य इत् संज्ञायां ‘तस्य लोपः’ इत्यनेन लोपप्राप्ते |
| रामेभ्य र् | ‘विरामोऽवसानम्’ इत्यनेन अवसानसंज्ञायाम् |
| | ‘खरवसानयोर्विसर्जनीयः’ इत्यनेन विसर्गादेशे कृते |
| रामेभ्यः | पदसिद्धम्। |

# पञ्चमीविभक्तिः

## रामात्

राम+ङसि ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन पञ्चम्येकवचनविवक्षायां ङसि-प्रत्ययः

राम+आत् ‘टाङसिङसामिनात्स्याः’ इत्यनेन ङसि-स्थाने आत्-आदेशे

‘अकः सवर्णे दीर्घः’ इत्यनेन दीर्घादेशे कृते

रामात् पदसिद्धम्।

## रामाभ्याम्

राम+भ्याम् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन पञ्चमी-द्विवचनविवक्षायां भ्याम्-प्रत्ययः

‘सुपि च’ इत्यनेन अकारस्य दीर्घादेशे कृते

रामाभ्याम् पदसिद्धम्।

# रामेभ्यः

राम+भ्यस् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन पञ्चमी-बहुवचनविवक्षायां भ्यस्-प्रत्ययः

राम+भ्यस् ‘सुपि च’ इत्यनेन मकारोत्तरस्य अकारस्य दीर्घे प्राप्ते

रामेभ्यस् ‘बहुवचने झल्येत्’ इत्यनेन आकारस्य एकारादेशे

रामेभ्यरु ‘ससजुषो रुः’ इत्यनेन स-कारस्य स्थाने रु इति आदेशे

रामेभ्य र् ‘उपदेशेऽजनुनासिक इत्’ इत्यनेन उ कारस्य इत् संज्ञायां ‘तस्य लोपः’ इत्यनेन लोपप्राप्ते

रामेभ्य र् ‘विरामोऽवसानम्’ इत्यनेन अवसानसंज्ञायाम्
‘खरवसानयोर्विसर्जनीयः’ इत्यनेन विसर्गादेशे कृते

रामेभ्यः पदसिद्धम्।

# षष्ठीविभक्तिः

## रामस्य

राम+ङस् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन षष्ठ्येकवचनविवक्षायां ङस्-प्रत्ययः

राम+स्य ‘टाङसिङसामिनात्स्याः’ इत्यनेन ङस् इत्यस्य स्थाने स्य आदेशे कृते

रामस्य पदसिद्धम् ।

## रामयोः

राम+ओस् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन षष्ठी-द्विवचनविवक्षायाम् ओस्-प्रत्ययः

रामे+ओस् ‘ओसि च’ इत्यनेन अकारस्य ए इति आदेशे

रामयोस् ‘एचोऽयवायावः’ इत्यनेन सूत्रेण अय्-आदेशे

रामयोरु ‘ससजुषो रुः’ इत्यनेन स-कारस्य स्थाने रु इति आदेशे

रामयो र् ‘उपदेशेऽजनुनासिक इत्’ इत्यनेन उ कारस्य इत् संज्ञायां ‘तस्य लोपः’ इत्यनेन लोपप्राप्ते

रामयो र् ‘विरामोऽवसानम्’ इत्यनेन अवसानसंज्ञायाम् ‘खरवसानयोर्विसर्जनीयः’ इत्यनेन विसर्गादेशे कृते

रामयोः पदसिद्धम् ।

## रामाणाम्

राम+आम् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन षष्ठी-बहुवचनविवक्षायाम् आम्-प्रत्ययः

राम+नुट्+आम् ‘ह्रस्वनद्यपो नुट्’ इत्यनेन आम् इत्यस्य नुट् इति आगमः

राम न् आम् नुट इत्यस्य अनुबन्धलोपे न् इति शेषे

‘नामि’ इत्यनेन अकारस्य दीर्घादेशे कृते

‘अट्कुप्वाङ्नुम्व्यवायेऽपि’ इत्यनेन नकारस्य णत्वे प्राप्ते

रामाणाम् पदसिद्धम्।

**सप्तमीविभक्तिः**

## रामे

राम+ङि ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन सप्तम्येकवचनविवक्षायां ङि-प्रत्ययः

राम+इ ‘लशक्वतद्धिते’ इत्यनेन ङ इत्यस्य इत् संज्ञायां तस्य लोपः इत्यनेन लोपप्राप्ते

‘आद्गुणः’ इत्यनेन एकारगुणादेशे कृते

रामे पदसिद्धम्।

## रामयोः

राम+ओस् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम् ङ्योस्सुप्’ इत्यनेन सप्तमी-द्विवचनविवक्षायाम् ओस्-प्रत्ययः

रामे+ओस् ‘ओसि च’ इत्यनेन अकारस्य ए इति आदेशः

रामयोस् ‘एचोऽयवायावः’ इत्यनेन सूत्रेण अय्-आदेशे

रामयोरु ‘ससजुषो रुः’ इत्यनेन स-कारस्य स्थाने रु इति आदेशे

रामयो र् ‘उपदेशेऽजनुनासिक इत्’ इत्यनेन उ कारस्य इत् संज्ञायां तस्य लोपः इत्यनेन लोपप्राप्ते

रामयो र् ‘विरामोऽवसानम्’ इत्यनेन अवसानसंज्ञायाम्
‘खरवसानयोर्विसर्जनीयः’ इत्यनेन विसर्गादेशे कृते

रामयोः पदसिद्धम्।

## रामेषु

राम+सुप् ‘स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप्’ इत्यनेन सप्तमी-बहुवचनविवक्षायां सुप्-प्रत्ययः

राम+सु ‘हलन्त्यम्’ इत्यनेन सूत्रेण प-कारस्य इत् संज्ञायां तस्य लोपः इत्यनेन लोपप्राप्ते

रामेसु ‘बहुवचने झल्येत्’ इत्यनेन अकारस्य एकारादेशे
‘आदेशप्रत्यययोः’ इत्यनेन सूत्रेण सकारस्य षकारादेशे कृते

रामेषु पदसिद्धम्।

# सम्बोधनम्

हे राम

| | |
|---|---|
| राम+सु | 'एकवचनं सम्बुद्धिः' इत्यनेन प्रथमायाः सम्बुद्धिसंज्ञा |
| राम+स् | 'उपदेशेऽजनुनासिक इत्' इत्यनेन उकारस्य इत् संज्ञायां 'तस्य लोपः' इत्यनेन लोपप्राप्ते<br>'एङ्ह्रस्वात् सम्बुद्धेः' इत्यनेन सम्बुद्धौ स कारस्य लोपप्राप्ते<br>सम्बोधनार्थकस्य हे इत्यस्य पूर्वप्रयोगे |
| हे राम | पदसिद्धम्। |

एवं हे रामौ, हे रामाः इति रूपद्वयमपि सिद्ध्यति।

धन्यवादः